- Title – देवी रहस्य
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 26/52
- Lines-
- Size
- Substance Paper –
- Script Devanagari देवनागरी
- Language – संस्कृत
- Period –
- Beginning –

- End –

- Colophon-
- Illustrations -
- Source -
- Subject -
- Revisor -
- Author - अज्ञात
- Remarks- अपूर्ण

घ्रो ह्वरेन विश्वमन्ते स्मृतो मन्त्रमौलिमणिः परः
इतिसदाशिवस्य ६ नमोरुद्राय तारंघोघांशि
वोरुद्रप्रसीदेतिपुगंवदेत् ।प्रन्ते ठः द्वयमीशा
निमन्त्रोयंदेवदुर्लभः ७ ॐनमोमहादेवाय तारं
पराशिवोदेविमहादेवायठद्वयम् मन्त्रः शिव
प्रदोदेविशेवावांपरमार्थदः ८ तारंकालीशिवो
नामन्तुरीरूपंचठद्वयंमन्त्रो भैरवविख्यातोक
लौभोगापवर्गदः २ इतिकरालस्य तारं वाग्भव
ला मायविकरायविम्रसेत् ।प्रन्ते ठद्वयमन्त्रार्यम ।
न्त्रराजोयमीरितः १० इतिविकरालस्य प्रणवंह
रितंडिम्भंनीलकण्ठायचाश्मरीदुर्गेशनीलकं
ण्ठस्यमन्त्रोह्यरोदशाक्षरः ११ तारंपरारमावी
जंशर्वायेतिपदंवदेत् ।प्रन्ते श्मरीमनोदेविमन्त्रो
यंभोगदः स्मृतः १२ प्रणवोवाग्भवोमारः शक्तिः
पशुपतेवनं मन्त्रोयंदेवदेवस्यवह्निभोगमुक्ति ।
साधनम् १३ तारे परामृडायेति विश्वमन्तेमनुः

दे॰ र॰ ११

स्मृत: १४ तारं त्य ऊं परालक्ष्मीर्मध्ये वूयान्यिनाक्षि
ने अग्नेे श्मरीमनो देविमन्त्रोयं वैरिसूदन: १५ तारं।
शिवो मठो दे विगिरि शायाश्मरी मनु: १६ तारं पराभ
द्रिकाच भीमा यांते श्मरी मनु: १७ माया शिवाद्वरं माया
महागणप मुद्धरेत् तये श्मरी मनोरन्ते मन्त्रोयं विप्र
हारक: १८ तारं पराचवा ह्रीकं प्रमथाधिप मुद्धरे त्
प्रसीद ह्र य मापोन्ते मन्त्रोयं देव दुर्लभ: १९ ऋ विकु
मा राय मनोर्यन्ते विक्ष मनु: पर: सर्वदे वेन्द्रपददो।
भोगदो मोक्षद: स्मृत: २० तारं काली शिवो देति।
क्रोधने शं तिचा श्मरी मन्त्रोयं सर्वसिद्धीशो वैरि वर्ग
निवर्हणं: २१ तारं रमा परालक्ष्मीरीश पेति वनं म
नु: तारं शिवं कामराज: कपाले शाय संवदेत् अन्ते।
७ ह्रय मुद्धृत्य मन्त्रोयं स्याद् शाक्षर: तारं काली यु
गं माया क्रूर भैरव उद्धरेत् प्रसीद ह्रय मापोन्ते म
न्त्रोयं सर्वसिद्धिद: २४ तारं वाणी शकरं कुम: सं
हाराये चलेवनं मन्त्रोयं देव देवस्य वर्णित स्तेद शा
क्षर: तारं मा भूति मा लक्ष्मीरीश्वराया श्मरी मनु:
२६ तारं च भासुरी माया भर्गा यांते श्मरी मनु: २७

तारं वान्हिः परावीजं रूरवेचाश्मरी मनुः २८ प्रण
वं कमला माया कालाग्नेय पदं ततः विष्ममन्ते मनोर्दे
वि मन्त्रराजोयमीरितः २९ तारं बोधं शिवो देवि
सद्योजाताय चाश्मरी उग्रतारा शिवस्यायमघ्य य
स्य मनुः स्मृतः ३० मात्रादिः षडभिज्ञा वन्हि कुंडला
तस्माद्विलं सारा जिह्व हृं वज्रांक गौत्तमाग्नि युगलं।
राच्याग्नि वज्रांकितं शांकौ वैचतमीष्ठ भौ र्वकपुतो
शन्यौ र्ववज्राश्मकाराच्यवीतुज सिन्धु मतुकालि
शामन्त्रोय माघोरिकः ३१ कूर्चं द्वन्द्वं महाकालप्र
सीदेति पदद्वयम् माया द्वन्द्वं वन्हि जायाराजरा
जेश्वरी मनुः ३२ वाग्भवं मदनशाक्तिं तारकामाप
रासकल विद्ययां चिता तारयुक्त विपरीत वीजकः
षोडशाक्षर विधिः शिवः स्मृतः इतीदं मन्त्र सर्व
स्वं रहस्यं परमं परं तव भक्त्या मया ख्यातं न चा
रव्येयं दुरात्मने इति श्री रुद्रयामले तन्त्रे देवी र
हस्ये शिव मन्त्रोद्धार विधिर्नाम तृतीयः पटलः ३
भैरवः अधुना कथयिष्यामि वैष्णवांस्तत्ततो स
नून् येन स्मरण मात्रेण दीक्षितो दीक्षितो भवेत्

६. मन्त्रोद्धारं प्रवक्ष्यामि लक्ष्मीनारायणस्य ते अ
र. ष्टसिद्धिप्रदं सद्यः साधकानां सुदुर्लभं तारं
१२ पराशाहरितं परालक्ष्मीस्ततोभिधम् लक्ष्मीना
रायणायेति विश्वमन्त्रे मनुः स्मृतः १ तारं रमा
वज्रं कामशक्तिर्मायाग्निराधेति पदं वदेत्स्व
कृष्णायकूर्चं हरठद्वयं स्याच्छ्रीकृष्णमन्त्रो मनु
राजमौलिः २ तारं परायुगं तारं विष्णवे विश्व
मंचले देवदेवस्य मन्त्रोयं विष्णोस्सव समीरि
तः ३ तारं रमा भूतिजवाक्स्मराश्च शक्ति
तृबीजं नरसिंहदेवं तुर्यांकिते वाकुटफड्नंते
प्रोक्तो हि मन्त्रो नरसिंहमन्त्रः ४ तारं रमा ऐं स
कलास्मराश्च लक्ष्मीवराहाय पदे वदेत्स्व अन्ते
श्मरी वैष्णवधामदायी लक्ष्मीवराहस्य मनुः स्मृ
तस्ते ५ तारापराभूतिरमाकुचार्णश्री जामदा
प ग्न्यांसरोजयुगं श्रापस्तथाग्नेगदितोयमीड्येय
घेष्ठदो भार्गवराममन्त्रः ६ तारं परालक्ष्मीस्सी
तारामेति संवदेत् प्रसीदयुगमापोऽन्ते मन्त्रोयं
भक्तिकारणं ७ तारं साभूतिमासारव्यं वेदे अ

नार्दितायच विष्वमन्त्रेमनोर्देवि मन्त्रोयंरि पुसूद
नः ८ तारं पराद्युगं लक्ष्मी। विष्वक्सेनाय संवदेत्।
कूर्चपद्मात्रयं नीरं वैष्णवानां सुदुर्लभः ९ तारं प
रार मावाणीकामो लक्ष्मी पदं वदेत् वासुदेवाय।
औ विष्वक्सेनमन्त्रोयं गमोक्षदाः इति श्रीरुद्रयाम
लेतन्त्रे देवीरहस्ये वैष्णवमन्त्रोद्धार विधिर्नाम चतु
र्थः पटलः ४ श्रीभैरवः अथ वक्ष्ये महत्तत्वं म
न्त्राणां परमार्थदं येन विज्ञान मात्रेण विद्यासि
द्धतिसत्वरम् उत्कीलनविधिं वक्ष्ये सर्वमन्त्ररह
स्यकम् अदातव्यमभक्तेभ्यो नारब्धेयं यस्यक।
स्यचित् शाक्तानां देवि मन्त्राणां शैवानांचा विशेष
तः वैष्णवानां मनूनां तु वक्ष्याम्युत्कीलनं प्रथमं ध्रुवम्
देवि बालायाः तृतीयाः स्मृए पार्वति वाणीम
न्त्रेत्रिरुच्चार्यभवेदुत्कीलनं मनोः २ अथ वक्ष्ये
रहस्यं ते कालिकाया महेश्वरि निष्कीलिता स्या
द्विद्येयं द्वाविंशत्यक्षरीपरा भद्रिकां प्रथमं दद्या
दन्ते कालीत्रयं वदेत् भद्रकाली मनोर्देवि भवे

दे. र. १६

दुत्कीलनं तथा ५ ठद्वयान्ते परं दद्याज्जपे त्सा
धकसत्तम: भवेदुत्कीलनं देवि राजमातङ्गि(
नीमनो: ६ विश्वान्ते मकले दद्याज्जपेत्पार्वतिजा
पक: मनोश्री भुवनेश्वर्या: स्यादुत्कीलनमुत्त
मं वधूमादौ पठेदन्ते तारं जप्त्वा च पार्वति ७ अ
यमुत्कीलनो मन्त्र: तारायाः समुदाहृत: मात्रो
द्वादशिकीमादौ जपेन्मन्त्रस्य पार्वति छिन्नशी
र्षीमनोरेष स्यादुत्कीलनक: पर: ८ मायामा
दौ वनान्ते च वाग्भवं साधको जपेत् सप्तरत्याम
न्त्रराजस्य भवेदुत्कीलनं तथा १ वाग्भवं प्रथमं
दद्याद्विश्वान्ते प्रणवं जपेत् सरस्वतीमनोर्देवि
मन्त्रस्योत्कीलनाभिध: विश्वमादौ जपेद्देवि व
नान्ते मदनं पठेत् अन्नपूर्णामनोरेष स्यादु
त्कीलनको मनु: ११ रमामादौ मनोर्दद्यात्मत्रय
मघांचले महालक्ष्मीर्मनोर्देवि मन्त्रस्योत्की
लनाभिध: १३ सिन्धूरे संजपेदादौ मायामन्ते
महेश्वरि शारिकामन्त्रराजस्य स्यादुत्कील
नको मनु: वनमादौ च नासाग्रे तारं दत्वा जपे

सिद्धवे शारदामन्त्रराजस्यमन्त्रस्योत्कीलना
भिध:१५ शक्तिवीजंपठेदादौ द्वयान्ते
चमन्मथम् इन्द्राक्षीमन्त्रराजस्यस्यादुत्कील
नकोमनु:१६ मद्वीजंचमनोरादौ वनान्ते प्र
णवंजपेत् मन्त्रोयंवगलामुख्या मन्त्रोत्कीलन
सिद्धिद:१७ त्रि:पठेद् भ्रमरीप्रान्ते प्रणवंसाध
कोत्तम: तुरोमन्त्रस्य मन्त्रोयंतूत्कीलफलप्रद:
१८ वह्निमादौ तथान्तेचतारंदत्वा महेश्वरि ज
पेन्मन्त्रंमहाराज्ञीमनूत्कीलनसिद्धये १९ रमा
मादौजपेद्देवि मन्त्रान्ते सकलंजपेत् ज्वालामु
खीमनोरेषमन्त्रोत्कीलनकोमनु:२० वेदीवीजं
पठेदादौनामान्ते प्रणवंजपेत् भीतामन्त्रस्यम
न्त्रोयंतूत्कीलनफलप्रद:२१ विध्वान्ते वाग्भवं
द त्वाकाममादौ जपेत्प्रिये कालरात्रिमनोर्दे
विस्यादुत्कीलनकोमनु:२२ तारत्रयंपठेद
न्ते मात्रयंप्रथमंजपेत् भवानीमन्त्रराजस्य
मन्त्रोयंकीलदोषनुत् परामन्तेजपेद्देवि व
ज्रयोगिश्वरीमनो: उत्कीलनाख्योमन्त्रोयंम
न्त्रसिद्धिफलप्रद: २४ मठमादौजपेद्देवि

दे॰ र॰ १५ ठद्वयान्ते हरं तथा वाराहीमंत्रराजस्य मन्त्रा
स्तु कीलनाभिधः २५ हरितं प्रथमं देवि विम्बा
न्ते वाग्भवं जपेत् सिद्धलक्ष्मीमनोर्देवि मन्त्रोस्तु
कीलनाभिधः २६ वेश्यामादौ वदनान्ते चवह्निं म-
नीजं जपेच्छिवे उत्कीलनाख्यो मन्त्रो यं कुलवा
गीश्वरी मनोः २७ वीचिवीजं जपेदादौ ठद्वया
न्ते पितारकं पद्मावतीमनोर्देवि मन्त्रोस्तु-
त्कीलनाभिधः २८ वाग्रांसं जपेदादौ वदनान्ते
सकलं जपेत् कुब्जिकामन्त्रराजस्य मन्त्रोयं-
कीलदोषहृत् २९ मठमादौ मनोर्देवि प्रण
वं ठद्वयोचले मन्त्रं जपेदयं मन्त्रो गौरीमन्त्र
स्य कीलहृत् ३० शक्तिमन्त्रे जपेद्बिम्बं प्रथमं
परमेश्वरि खेचरीमंत्रराजस्य स्यादुत्कील
नकोमनुः ३१ कूर्चमादौ मनोरन्ते व्योषं दत्वा
जपेच्छिवे मनोनीलसरस्वत्याः स्यादुत्कील
नको मनुः ३२ शक्तिमादौ मनोर्देवि वासना
मंचले जपेत् पराशक्तेर्मनोर्देवि कीलदो-

ता:

पापहोमन्तु: ३३ श्रीभैरव: अधुनाशैवमन्त्रा
णांकेचिद्देविमन्त्रमा: निष्कीलितामयाख्या
ता: केचित्सार्वतिकीलिता: महेश्वर:।शिवोरु
द्रोमहादेव: करालक: विकराल:।शिव: शर्व:
मृड: पशुपतिस्तथा।पिनाकीगिरिशोभीम:
कुमार: प्रमथाधिप: क्रोधेशईशईशानि
कपालीक्रूरभैरव: एतेमन्त्रामहादेविकीलदो
षविवर्जिता: पुरश्चरणमात्रेणफलंदास्य।
न्तिसत्वरं अथवादेवदेवेशिवक्ष्येतत्वपरा
त्परं एतेषांशैवमन्त्राणांकृतागोप्यतमंकु
रु मन्त्रादिवीजंदेवेशिप्रतिमन्त्रंजपेत्सुधी:
त्रिवारंसाधकोयेनभवेदुत्कीलनंमनो: मृत्यु
जयोमृतेशानोवटुकोनीलकण्ठक: सद्यो
जातगणेशगणेशाश्च देवेशोघोरभैरव: म
हाकालोमहादेविकामेश्वरइतिप्रिये एतेम
या न्त्रामहादेविकीलितामन्त्रसिद्धये एतेषांश्रृण
मन्त्राणांदेवेश्युत्कीलनंपरम् येनोच्चारण
मात्रेणमन्त्रसिद्धि: प्रजायते हृजवीजंजपे॥

दे॰ र॰ १४

दादौ प्रान्ते शक्तिं जपेत्प्रिये श्रीमृत्युंजयमन्त्रस्य
मन्त्रोस्युत्कीलनाभिधः १ तारमन्ते जपेदादौ
शक्तिमन्त्रस्य पार्वति त्र्यम्बकेश्वरमन्त्रस्य स्यादयं
कीलदोषहृत् २ परामादौ जपेदन्ते प्रणवं साध
कोत्तमः मन्त्रोवटुकमन्त्रस्य स्यादयं कीलनाश
नः ३ हरितं प्रथमे दत्वा मन्त्रान्ते च शिवे जपेत्
दुर्गाशिवस्य मन्त्रोयं नीलकण्ठस्य कीलहृत्
शिवमादौ जपेदन्ते तारे पार्वति साधकः उग्रता
राशिवस्यायं मन्त्रो मन्त्रस्य कीलनुत् ५ मायां
मेत जपेद्देवि शिवमादौ च साधकः महागणप
ते र्मन्त्रो मनोरुत्कीलनाभिधः ६ विष्णुमादौ मनो
र्देवि मात्रादिचान्तले जपेत् अघोरभैरवस्या
यं मनोरुत्कीलनो मनुः ७ एषामपि महाका
लो निष्कीलित इति स्मृतः अस्य मन्त्रप्रसादेन
सर्वे निष्कीलिताः शिवे कामेशकूटत्रयं त्रं प्र
थमं ऐं त्रये जपेत् श्रीविद्याशिवमन्त्रस्य स्यादु
त्कीलनको मनुः ८ अथाहं वै सम वाणांते म
न्त्राणां वच्मि पार्वति उत्कीलनमानून्ये बांज

॥

यमात्राच्छिवं भवेत् हरितं प्रथमं दद्यादन्ते प्रणव
मीश्वरि लक्ष्मीनारायणस्यायं स्यादुत्कीलनको
मन्त्रः १ शक्तिमादौ मनोरन्ते वाग्भवं साधको जपे
त् श्रीराधाकृष्ण मन्त्रस्य मन्त्रोयं कीलदोषहृत् २
परां पुनं जपेदन्ते विश्व मादौ जपेन्मनोः विष्णुमन्त्र
स्य मन्त्रोयं स्यादुत्कीलनाभिधः ३ स्मरमादौ ज
पेदन्ते नृवीजं साधकोत्तमः लक्ष्मीनृसिंहमन्त्र
स्य मन्त्रोयं कीलदोषहृत् ४ तारमन्ते रमामादौ
जपेत्साधकसत्तमः लक्ष्मीवाराहमन्त्रस्य भवेदु
त्कीलनं परं ५ कुचवीजं जपेदादौ मन्त्रान्ते पञ्चपु
ष्पकं मनो भार्गवरामस्य भवेदुत्कीलनं शिवे ६ प
रां मन्ते रमामादौ जपे त्पार्वति सिद्धये श्री सीताराम
मभद्रस्य मनोर्मन्त्रोऽस्ति कीलहृत् ७ मामन्ते प्र
ष्प थमं मां च जपेत्पार्वति साधकः जनार्दनमनो
र्मन्त्रः स्यादुत्कीलनकाभिधः ८ लक्ष्मीमादौ
परामन्ते सकृदुच्चारयेत्सुधीः विष्वक्सेनमनो
र्देवि स्यादुत्कीलनको मनुः ९ काममादौ च

दे. र. १६

मन्त्रान्ते तारं देवि जपेत् सुधीः वामदेवमनो मं
त्रः स्यादुत्कीलनकाभिधः १ इति ते महादेवि न
मन्त्राणां परमार्थदं तव स्नेहैः कथितं नाख्येयं ब्र न
ह्मवादिभिः इति श्रीदेवीरहस्ये मन्त्रोत्कीलन
विधिर्नाम पंचमः पटलः ५ श्रीभैरव उवाच
अथ ते वर्णयिष्यामि संजीवनमनून् प्रिये येषा
मुच्चारमात्रेण मन्त्रः सिद्धिप्रदो भवेत् बाला
या देवि चतुर्थ्याः शक्तिमादौ पठेत् सुधीः संजी
वनाख्यो मन्त्रो ये दिव्यो मन्त्रस्य सिद्धये परा
त्रये पठेदादौ जीवनं भैरवीमनोः २ कूटत्रया
णां देवेशि त्रिकूटाय जपेत् सुधीः द्वितीयाणां त्र
यं देवि भवेत् संजीवनं मनोः ३ सिद्धविद्या महाश्या
मा सर्वदोषविवर्जिता जप्या सिद्धो सदा सद्भि
र्मुमुक्षुभिः ४ भद्रिकायुगलं देवि दद्यादन्ते मनोः
शिवे भद्रकालीमनोरेष स्यात् संजीवनको मनुः ५
तारं परं पठेदन्ते जपादौ साधकेश्वरि राजमा
तङ्गिनो देव्या भवेत् संजीवनं मनोः ६ वारत्रये

पठेदादौ मूलमन्त्रस्य वैपरां मंत्रस्य भुवनेश्व
री भवेत्सञ्जीवनं परं ७ कालीत्रयं पठेदन्तेम
न्त्रस्यास्य महेश्वरि ३ ग्रतारामनोरेषस्या संजी
वनको मनुः ८ वासनां मूलमन्त्रस्य जपेदन्ते म
हेश्वरि छिन्नमस्तामनोरेषस्या संजीवनको
मनुः ९ परमादौ जपेद्देवि कामान्ते च तथैव च सु
न्दरी मन्त्रराजस्य भवेत्संजीवने प्रिये १० तार
द्वयं जपेन्मन्त्री मन्त्रान्ते मात्रिकेश्वरि सरस्व
ती मनोरेषस्या संजीवनको मनुः ११ विश्व
मन्ते जपेदादौ ठद्वयं कौलिकेश्वरि अन्नपूर्णा
मनोरेष भवेत्सञ्जीवनं परं १२ वाणीमन्ते ज
पेदादौ कामराजं च साधकः महालक्ष्मी मनोर्दे
वि भवेत्सञ्जीवनं परं १३ कूर्चमादौ परामन्ते
जपेत्साधकसत्तमः शारिकामूलमंत्रस्य
भवेत्संजीवने प्रिये १४ कामराजं जपेदादौ
मायावीजं तथोचले शारदामन्त्रराजस्य
सञ्जीवनमनुः स्मृतः १५ मन्मथं शक्तिवी
जं च जपेदादौ च साधकः इन्द्राक्षी मूल

सं॰ ८

मन्त्रस्य संजीवनमनुं परः १६ मस्त्रा बीजं ज
पेद्देवि प्रणावं चवनांचले बगला मन्त्रराजस्य
भवेत्संजीवनं परं १७ तारकं मूलमन्त्रान्ते त्रि
रुच्चार्य जपेत्प्रिये तुर्या मन्त्रस्य निर्जीतः सं
जीवनमनुः परः १८ वह्नि बीजं जपेदन्ते शक्ति
मादौ महेश्वरि ज्वालामुखी मनोरेष मन्त्रः
सञ्जीवनाभिधः १९ वाग्भवं प्रणवादौ च ठ
द्वयान्ते जपेत्परम् राक्षसंजीवनेन मन्त्रो भीडा
भगवतीमनोः २० तारमन्त्रे रमामादौ जपेत्सा
धकसत्तमः गणेश्वरीकालरात्र्याः स्यात्संजी
वनको मनुः २१ कूर्चमादौ हरान्ते च जपेत्पार्वति
साधकः भवानी मूलमन्त्रस्य भवेत्संजीवनं प
रं २२ मायामुच्चार्य देवेशि त्रिरादौ त्रिरुच्चा
र्यांचले संजीवनमनुर्देवि स्याच्छत्रायोगि
नी मनोः २३ मठमन्त्रे मठमादौ जपेत्पार्वति
कौलिकः मन्त्रोऽयं धूम्रवाराह्यामनोः सञ्जी
वनाभिधः २४ हरितं मूलमन्त्रान्ते जपेदा

दै ५

वसन्त यं सिद्धलक्ष्मी मन्त्रो रेषस्यात्सञ्जीवन
को मन्त्रः २५ कोन्नामादौ रमा मन्त्रे जपेत्साध
कसत्तमः भवेत्सञ्जीवनं देवि कुलवागीश्वरी
मन्त्रोः २६ कामं मादौ महादेवि जपेद्मन्त्रे मांशि
वे पद्मावती मन्त्रो रेषस्मृतः सञ्जीवनो मन्त्रः २७
वाग्भवं पंकजाते च प्रणवादौ परं जपेत् कुब्जिका
मूल मन्त्रस्य मन्त्रो संजीवनाभिधः २८ वा ह्रीकं
प्रणवादौ च मूलान्ते दशिवं जपेत् गौरी मन्त्रस्य
मन्त्रोयं स्यात्सञ्जीवनकाभिधः २९ कूट मन्त्रे
विश्वमादौ जपेत्पार्वति साधकः खेचरी मन्त्र
राजस्य भवेत्सञ्जीवनं शिवे ३० वाणीमादौ प
रा मन्त्रे जपेन्मान्त्रिक साधकः भवेत्सञ्जीवनं
देवि नीलसरस्वती मन्त्रोः ३१ वाग्भवं प्रणवादौ
च कामान्ते च जपेत्सुधीः एष सञ्जीवनो मन्त्रः
पराशक्ति मन्त्रोः स्मृतः ३२ प्रधुना शेन मन्त्रा
णां निष्कीलनं महेश्वरि वक्ष्येत त्वं रहस्यं ते सं
न जीवैकरं परं मूलमन्त्रां च लेमन्त्री जपेत्तारं प
घक्पृथक् सर्वेषां चैव मन्त्राणां भवेत्संजीवनं प्रिये

त्

१६. तथापिकीलितानां ते सञ्जीवनं मनू[illegible]वेषेषां
१७. साधनमात्रेण मूलविद्या प्रसिद्ध्यति सूर्यना
१८ मान्तर द्वन्द्वं जपेदादौ तु साधकः मृत्युंजय मनो
रेषमन्त्रः सञ्जीवनाभिधः १ विघ्नमादौ विघ्न
मन्ते जपत्मात्रिकनायकः अमृतेश्वर मन्त्रस्य
भवेत्सञ्जीवनं परं २ वटुकायेति तारादौ जपे
त्पार्वति साधकः संजीवन मन्त्रः प्रोक्तो वटुक
स्यैव दुर्लभः ३ शिवं च प्रणवादौ तु जपेत्साधक
वन्दिते श्रीनीलकण्ठ मन्त्रस्य मन्त्रः संजीना
भिधः ४ परामादौ त्रिरुच्चार्य जपादौ संजपेत्सु
धीः सद्योजात मनोरेष स्मृतः संजीवनो मन्त्रः ५
शिवमन्ते द्विरुच्चार्य जपेद्देवि जपादितः महा
गणपतेर्मन्त्र मनो स्संजीवनाभिधः ६ वज्रबी
जानि मूलादौ जपेत्पार्वति साधकः अघोर देव
मन्त्रस्य मन्त्रः संजीवनः स्मृतः ७ निर्दोषो म
न्त्रराजोयं महाकालस्य पार्वति अस्योच्चारण
मात्रेण मन्त्रः सिद्ध्यति सर्वदा ८ कूट त्रयेभ्यो
देवेशि द्वितीया द्वरमुच्चरेत् जपे कामेश्व

ला य नमः मध्ये इति द्वारदेवताः सम्पूज्य गृहां
तः प्रविश्य ॐ आसनशोधनमंत्रस्य मेरुपृष्ठ
ऋषिः सुतलं छंदः कूर्मो देवता आसनशोधने वि-
[illegible]ो पृथिव्यै ॐ अनंताय वं वसुंधरायै नमः मंत्रः।
पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं च धा
रय मां लोके पवित्रं कुरु चासनम् ॐ ह्रीं श्रीं क्लीं प
द्मासनाय नमः सिंहासनाय नमः भद्रासनाय
नमः अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ये
भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया इति ताल
त्रयं दत्वा नाराचमुद्रां प्रदर्श्य गुरुं ध्यायेत् अज्ञा
न तिमिरांधस्य ज्ञानांजनशलाकया चक्षुरुन्मीलि
तं येन तस्मै श्रीगुरवे नमः ॐ ऐं ग्लौं आत्मतत्वं शो
धयामि नमः। विद्यातत्वं शोधयामि नमः शिव
तत्वं शोधयामि नमः इत्याचम्य पूर्वोक्तं प्राणाया
मत्रयं विधाय भूतशुद्धिं कुर्यात् ह्रीं कुंडलिनीं ध्या
त्वा [illegible] सुषुम्णावर्त्मना वायुं प्रोत्थ्य [illegible] तत्राधिष्ठा
नमानीय स्वशरीरं भस्मीभूतं विचिंत्य यं रं लं
वं ब्रह्मपदयानजीवात्मानं विचिंत्य तत्र हंसः

दे॰ र॰ उ॰ ५

१०

धामानीय तो यात्वा त्मानं संस्थाप्य विगतकल्मषं देहं
विनाव्यस्वस्थानं देहमानीय प्राणप्रतिष्ठापयेदि
ति भूतशुद्धि: ॐ ह्रीं मम प्राणा इह प्राणा: १६ मम
जीव इह स्थित: १६ मम सर्वेंद्रियाणि वांमनश्चक्षु: ५
श्रोत्र जिह्वा घ्राण प्राणा इहैवागत्य सुखं चिरं तिष्ठंतु
स्वाहेति प्राणप्रतिष्ठा क्रम: तत: पुनराचम्य प्राणाया
मं विधाय न्यासपूर्वं संकल्पं चरेत् ॥ अस्य श्री वरद
गणेश मंत्रस्य ब्रह्मा ऋषि: महागणपतिर्देवता गा
यत्रं छन्द: गं बीजं ह्रीं शक्ति: कुरु कुरु कीलकं श्री
महागणपति प्रीत्यर्थं त्रैलोक्य विजये विनियोग: ॥ अ
थ न्यास: ब्रह्मा ऋषये नम: शिरसि गायत्री छन्द
से नमो मुखे महागणपति देवतायै नमो हृदि गं
बीजाय नमो नाभौ ह्रीं शक्तये नम: ॥ कुरु कुरु
कीलकाय नम: पादयो: त्रैलोक्य विजये विनि
योग इति सर्वांगेषु इति ऋषिन्यास: गां अंगुष्ठा
भ्यां नम: गीं तर्जनीभ्यां नम: गूं मध्यमाभ्यां न
म: गैं अनामिकाभ्यां नम: गौं कनिष्ठिकाभ्यां न
म: ग: करतलकरपृष्ठाभ्यां नम: इति कर
न्यास: गां हृदयाय नम: गीं शिरसे स्वाहा गूं ।

ॐ शिखायै वषट् गैं कवचाय हुं गौं नेत्रेभ्यो वौषट् गः अस्त्राय फट् इति हृदयादि षडंग न्यासः ॐ आत्मतत्वं हृदयाय नमः ॐ विद्यातत्वं शिरसे स्वाहा ॐ शिव शक्ति तत्वं शिखायै वषट् ॐ गुरु तत्वं कवचाय हुं ॐ योगतत्वं नेत्रेभ्यो वषट् ॐ सर्वतत्वं अस्त्राय फट् इति तत्व न्यासः ॐ अं कं खं गं घं ङं आं हृदयाय नमः इं चं छं जं झं ञं ईं शिरसे स्वाहा ॐ टं ठं डं ढं णं ऊं शिखायै वौषट् एं तं थं दं धं नं ऐं कवचाय हुं ॐ पं फं बं भं मं ॐ नेत्रेभ्यो वौषट् अं यं रं लं वं शं षं सं हं क्षं अः अस्त्राय फट् एवं करन्यासः ॐ गं काशी पीठाय नमो हृदये ॐ गं कांची पीठाय नमः शिरसि ॐ गं मधुपुरी पीठाय नमः शिखायै ॐ गं उज्जैन पीठाय नमः कवचे ॐ गं अयोध्या पीठाय नमो नेत्रयोः ॐ गं जालंधर पीठाय नमः अस्त्रं इति पीठ न्यासः ॐ हृदयाय नमः ह्रीं गणपति शिरसे स्वाहा श्रीवर वरद शिखायै वौषट् क्लीं सर्वजनं मे कवचाय हुं ग्लौं वशमानय नेत्रेभ्यो वौषट् गं स्वाहा अस्त्रा।

यफट् एवंकरन्यासः इतिमंत्रन्यासः एवंन्यासंवि
धाय श्रीचक्रं ध्यात्वा चतुरस्रंषोडशदलंवसुद
लं दशारं त्रिकोणंविंदुं विचिंतयमद्रपीठो परिमू
लेन संस्थाप्ययोगपीठपूजांकुर्यात् ह्रीमराडू
कायनमः कालाग्निरुद्रायनमः मूलप्रकृत्यै
नमः आधारशक्त्यैनमः कूर्मायनमः अनंताय
नमः वराहायनमः पृथ्व्यैनमः उपर्युपरिसं
पूज्य तन्मध्ये सुधार्णवायनमः नवरत्नविरा
जितनवखंडमयस्वेतद्वीपायनमः तत्रेशाना
दिषष्ठसप्राद[illegible]पेनवरत्नखंडेभ्योनमः ए
वं तन्मध्ये पद्मरागरत्नखंडायनमः मध्येसु
वर्णपर्वतायनमः उपरि नंदनोद्यानायन
मः मध्येकल्पवनायनमः विचित्ररत्नखचि
तभूमिकायैनमः मध्ये सहस्रस्तम्भान्वित
मध्यस्तम्भविराजितचतुष्कचाशद्योजनवि
स्तीर्णनानारत्नखचितरत्नमिचिवेदिकायै
नमः चिंतामणिमंडपायनमः मध्येनवर
त्नखचितरत्नमयवेदिकायैनमः उपरि

सिंहायनमः उपरि उर्ध्वे: श्वेतछत्रायनमः
पीठस्यकल्पितान्निकोणादिषु धर्मायनमः इति
कल्पितपूर्वादिषु अधर्मायनमः इतिसिंहास
नमध्ये आनंदकंदायनमः संविन्नालायनमः
सहस्रदलकमलायनमः प्रकृतिमयपत्रेभ्योन
मः विकृतिमयकेसरेभ्योनमः पंचाशद्वर्णबीजाय
नमः सर्वतत्वरूपायकर्णिकायैनमः उपरि अंअ
र्कमंडलायनमः संसोममंडलायनम रंवह्निमं
डलायनमः तंतमसेनमः रंरजसेनमः संसत्वा
यनमः ह्रींगंह्रीं सर्वमंत्रासनायनमः ॐअमित्या
दिज्ञान[illegible]यशिव शक्तिसदाशिवेश्वरमहाग
णपतिसकलात्मनेश्री योगपीठायनमः इतियोग
पीठपूजांविधाय पात्राणिस्थापयेत् स्वमावभा
गेत्रिकोणषट्कोणवृत्तचतुरस्ररूपंयंत्रंविलिख्य
शंखमुद्रांप्रदर्श्य गामितिषडंगमंत्रैः संपूज्य अस्त्रा
यफट्इतिपादिकांप्रक्षाल्य मूलेनसंस्थाप्य मं
वह्निमंडलायदशकलात्मनेनमः इतिमहागण
पतिपात्रासनायनमः गंधादिभिरभ्यर्च्यतदुपरि
संस्थाप्य ॐसूर्यमंडलायनमः द्वादशकला
त्मनेनमः महागणपत्यर्घपात्रायनमः इतिगं

१. धात्तैरभ्यर्च्य ततोंकुशमुद्रया गंगंगे च यमुने चैव
२. वगोदावरि सरस्वति नर्मदे सिंधु कावेरि जलेस्मि
३. सन्निधिं कुरु इति तत्र तीर्थमावाह्य मूलेनाष्टा
४३ भिमंत्र्य षडंगैः संपूज्य मत्स्यमुद्रयाच्छाद्य फड
ति छोटिकाभिः संरक्ष्य हुमितिवगुंठ्य वसिमम् अ
तीकृत्वा शंखचक्रमुसलयोनिमुद्राः प्रदर्श्य तेने
व जलेन यागवस्तूनि प्रोक्षयेत् ॐ मूलं परमामृ
तरूपेण महागणपति चंद्रमंडलनिवासाय चं
द्रामृतेन पूरय २ द्रव्यं पवित्रीकुरु २ हैं जुं सः
स्वाहा अनेन सर्वं प्रोक्षयेत् तदुत्तरे पाद्याचमनी
य मधुपर्कपात्राणि संस्थाप्य संपूज्य आत्मानं तन्मयं वि
भाव्य ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय यो
गपीठात्मने नंताय नमः इति संपूज्य सशक्तिकं
देवं मूलेनावाह्य मूलेन नव मुद्राः प्रदर्श्य मूलें न
षडंगं विधाय प्राणान्प्रतिष्ठाप्य स्वागतमित्यु
दीर्य मूलेन पाद्यार्घ्यं दद्यात् एवं पाद्याचमनी
यनीय मधुपर्क स्नानं विधाय मातृकाक्षरै
रभ्यर्च्य तैः धूपदीपनैवेद्याचमनीयादी

त्रिवेय पुष्पांजलित्रयं दत्वा देवस्यावरणदेव
ता: पूजयेत् ॐ ह्रीं श्रीं सर्वाशापूरकचक्राय नम: इ
ति पुष्पांजलिं दत्वा ह्रीं श्रीं इंद्राय नम: पूर्वे ३ वरुणा
य नम: पश्चिमे ३ धर्मराजाय नम: दक्षिणे ३ कुबे
राय नम: उत्तरे इति गंधाक्षतैरभ्यर्च्य इति प्रथमा
वरणं १ मूलेन पुष्पांजलिं दत्वा ॐ ह्रीं श्रीं नंदिने न
म: ३ वीरेशाय नम: ३ सौभाग्याय नम: ३ भृंगि
रीटिने नम: ३ विराटकाय नम: ३ पुष्पदंताय
नम: ३ विकर्ताय नम: ३ प्रमथगणाय नम: ॥ ८
चित्रगणाय नम: ३ उग्ररूपाय नम: ३ पुष्पाय न
म: ३ लोहिताय नम: ३ सुंदराय नम: ३ नूपुरा
ढ्याय नम: ३ विचाराय नम: ३ विनर्तकाय नम:
३ इति गंधाक्षतै दक्षिणावर्तेनाभ्यर्च्य द्वितीयाव
रणं ३ मूलेन पुष्पांजलिं दत्वा ॐ ह्रीं श्रीं कराला
य नम: ३ विकरालाय नम: ३ संहाराय नम: ३
रुरवे नम: ३ महाकालाय नम: ३ कालाग्नये
नम: ३ सितास्याय नम: ३ असितानने नम: ३
इति गंधाक्षतदूर्वाभिरभ्यर्च्य दक्षिणावर्तेन
तृतीयावरणम् ३ मूलेन पुष्पांजलिं दत्वो ॐ ह्रीं श्रीं

ॐ नाय कालाय नम: ३ विघ्नांतकाय नम: ३ गणाध्यक्षाय नम: ३ ग॰ ज्ञानरूपाय
नम: ३ दिग्वासाय नम: ३ कपालिने नम: ३ भस्मांगरागाय नम: ३ गजवक्त्राय नम: ३ ...
साय नम: ३ एकदंताय नम: ३ वक्रतुण्डाय नम: ३ इति गन्धाक्षतैरर्च्य ...

चतुर्थावरणं ४ दशारपूजा मूलेनपुष्पांजलिंद-
त्वा ॐ ह्रीं श्रीं कुमारायनमः अग्रे ३ जयंतायनमः
३ दक्षे प्रद्युम्नायनमः वामे इतिगंधाक्षतदूर्वाभिः
त्रिकोणं संपूज्य पंचमावरणं मूलेनपुष्पांज
लिंदत्वा विद्यामुच्चार्य ह्रीं स्वशक्तिसहिताय
महागणपतयेनमः इतिसप्तधासंपूज्यषष्ठा
वरणं मूलं गणेशायनमः गांगेयायनमः
सिंहासनायनमः विघ्नांतकायनमः आखु
वाहायनमः त्रिपुरांतकायनमः इतिपरिगं 3
धाक्षतदूर्वाभिरभ्यर्च्यसप्तमावरणंउपरिमू
लं शतपत्रायनमः सहस्रारायनमः दंतमा
लायैनमः मोदकपात्रायनमः सुधाकलशा
यनमः परशवेनमः शंखायनमः पंचजन्मा
यनमः इतिदर्शनेनापिशंखस्यकिंपुनःस्प-
र्शनेनचविलयंयांतिपापानिहिमवद्भास्करो
दये इतिसप्तधासंपूज्याष्टमावरणं ततोमू-
लमुच्चार्य गंधाक्षतदूर्वापुष्पधूपदीपनैवे
द्याचमनीयमानीयताम्बूलछत्रचामरादीन्सं

तर्प्यं देवाग्रे षडंग सर्वां न्यासं विधाय देवं ध्यात्वा
मूलेन मालामभ्यर्च्य यथाशक्त्या मूलं जपेत् त
तो मूलमुच्चार्य देवाय जपं समर्प्य कवचसहस्र
नामस्तव पाठं देवाग्रे कृत्वा मूलं ८ प्रातः प्रभृति सा
यांतं स्नायादि प्रातरं ततः यत्करोमि गणाध्यक्षात्तद
स्तु तव पूजनं इति नत्वा संहार मुद्रया स्वशक्तिकं
देवं विसर्जयेत् इति श्रीदेवीरहस्ये तंत्रे महागण
पति वरद गणेश पूजा पद्धति वर्णनं नाम सप्तविंशः
पटलः २७ इति श्री नित्य पूजायाः पद्धतिं गंधरू
पिणी महागणपतेर्दिव्यां सर्वेषां देवि गोपयेत् ॐ
श्रीगणेशाय नमः श्री भैरवः महादेवि गणेशस्य
वरदस्य महात्मनः कवचं ते प्रवक्ष्यामि वज्रपंजरका
भिधम् अस्य श्रीवज्रपंजरकाभिधगणपतिकव
चस्य श्रीभैरव ऋषिः गायत्री छंदः श्रीमहाग
णपतिर्देवता गं बीजं ह्रीं शक्तिः कुरु २ कीलकम्
सर्वेष्टकामनासिद्ध्यर्थे पाठे विनियोगः अथ ध्या
नं विघ्नेशं विश्ववंद्यं सुविपुलयशसं लोकरक्षा ९
प्रदक्षं साक्षात्सर्वापदासु प्रशमनसुमतिं पार्व
तीप्राणसूनुं पायात्सर्वासुरेंद्रैः सकुरमुनि ग

दे. र. उ. ८५

रौः साधकैः पूज्यमानं कारुण्येनांतरायामित
भयशमनं विघ्नराजं नमामि ॐ ह्रीं श्रीं गं शि
रः पातु महागणपतिः प्रभुः विनायको ललाटं मे
विघ्नराजो भ्रुवौ मम पातु नेत्रे गणाध्यक्षो नासि
कां मे गजाननः श्रुती मेवतु हेरम्बो गंडौ मे मोद
काशनः द्वैमातरो मुखं पातु चातुरो पातरिंदमः
२ दंतान्ममैकदंतो व्याद् वक्रतुंडोवतान्नसाम् गांगे
यो मे गलं पातु स्कंधौ सिंहासनोवतु विघ्नांतको
भुजौ पातु हस्तौ मूषकवाहनः उरो ममावतान्नि
त्यं देवस्त्रिपुरघातनः हृदयं मे कुमारोव्यात्जयंतः
३ पार्श्वयुग्मकम् प्रद्युम्नो मेवतात्पृष्ठं नाभिं शंक
रनंदनः कटिं नंदिगणः पातु शिश्नं वीरेश्वरो
वतु मेढ्रं मेवतु सौभाग्यो भृंगिरीटी च गुह्यक
म् विराटकोवतादूरू जानू मे पुष्पदंतकः जंघे।
मम विकर्णोव्यात् गुल्फौ वंत्रगवतु पादौ चित्तग
णः पातु पादादौ लोहितोवतु पादपृष्ठं सुंदरो।
व्यात् पुराढ्यो वपुर्मम विचारो जठरं पातु भू
भूतानि चोग्ररूपकः शिरसा पाद पर्यंत वपुः
सुप्रगणोवतु पादादि मूर्ध पर्यंतं वपुः पातु नि।

वर्तकः विस्फारितं चय स्यानं गणेशस्तु सदावतु पू
र्वे मां ह्रीं करालो व्याद्याग्नेये विकरालकः दक्षिणे पातु
संहारो नैर्ऋत्यां रुरुभैरवः पश्चिमे मां महाकालो वा
यौ कालाग्निभैरवः उत्तरे मां सितास्यो व्यादैशान्यां
सितात्मकः प्रभाते शतपत्रे व्यात्सहस्रारस्तु म
ध्यमे दंतमालो दिनांते व्यान्निशि पात्रं सदावतु
कलशं मां निशीथे व्यान्निशांते परशुस्तथा सर्व
त्र सर्वदा पातु शंखयुग्मं च मद्वपुः ॐ ॐ राजकुले
हं हौं रणे भये विह्रीं ह्रीं हुं द्यूतावते क्लीं श्रीं शत्रुभये
श्रौं जलभये क्लीं क्लीं वनानेवतु ग्लौं ग्लुं ग्लैं गुंस
त्वभीतिषु महा व्याध्यार्तिषु ग्लौं गणौ नित्यं यतात्पि
शाचभूत फणिषु ग्लौं गं गणेशोवतु इतीदं कवचं
गुह्यं सर्वतंत्रेषु गोपितं वज्रपंजर नामानं गणेश
स्य महात्मनः अंगभूतं मनुमयं सर्वाचारैक सा
धनम् विनानेन न सिद्धिस्स्यात् पूजनस्य जपस्य
च तस्मात्तु कवचं पुण्यं पठेद्वा धारयेत्सदा त
स्य सिद्धिर्महादेवि करस्था पारलौकिकी यं यं का
मयते कामं तं तं प्राप्नोति साधकः अर्धरात्रे पठे
न्नित्यं सर्वाभीष्टफलं लभेत् इतीदं दिव्यं शुभकवचं

दे: महागणपतिकवचं संपूर्तं अस्यानुस्तवराजः ॐ ।
र: श्रीगणेशाय नमः श्रीभैरवः ॐ शृणु देवि रह
३: स्यं मे यत्पुरा सूचितं मया तव भक्त्या गणेशस्य वक्ष्ये
४६ नामसहस्रकम् श्रीदेव्युवाच भगवन् गणनाथस्य २
वरदस्य महात्मनः श्रोतुं नामसहस्रं मे हृदयं प्र
मुकायते भैरवः अ त्रिपुरनाशे तु जाता विघ्न १
कुलाः शिवे मोहेनमु स्ते वेतस्स सर्वे विलद
र्पिताः तदाप्रभुं गणाध्यक्षं स्तुत्वा नामसहस्र
कैः विघ्नाः दूरं पलायंते कालरुद्रादिव प्रजाः त
स्यानुग्रहतो देवि जातो हं त्रिपुरान्तकः रमः पि
गणेशानं स्तौमि नामसहस्रकैः अस्य श्रीवर
दगणेशसहस्रनामस्तोत्रमंत्रस्य भैरव ऋषिः
गायत्री छंदः गणपतिर्देवता गं बीजं ह्रीं शक्तिः
कुरु २ कीलकं आत्मनो धर्मार्थकाममोक्षार्थे
होमे वि॰ जेतुं यः विभ्रत् ॐ ह्रीं श्रीं क्लीं गणाध्य
क्षौ ग्लौं गं गणपतिर्गणी गुणाढ्यो निर्गुणो गोप्ता ध्यो:
गजवक्त्रो विभावसुः विश्वेश्वरो विभादीप्तो दी
पनो धीवरो धनी सदाशांतो जगत्त्राता विश्व ।

केतेनो विभाकरः विस्रम्भी विजयी वैद्यो वारांनि
धि रनुत्तमः प्रनीयान्विभवेश्रेष्ठो ज्येष्ठो गा
पाप्रियो गुरुः सृष्टिकर्ता जगद्धर्ता विश्वकर्ता
जगन्निधिः पतिः पीत विभीषांगोर क्तान्तो लो
हिताम्बरः विरूपाक्षो विमानस्थो विनयो
नुनयः सुखी स्वरूपः सात्विकः सत्यः शुद्धः
शंकरनंदनः नंदीश्वरः सदानंदी वंदिस्तुत्यो
विचक्षणः दैत्यमर्दी सदाक्षो वोमदि वारुण
लोचनः सर्वात्मा विश्व सारश्च विश्व चारी वि
लेपनः परंब्रह्म परंज्योतिः स्वाक्षी त्रिलोविक
र्तनः वीरेश्वरी वीर हर्ता सौभाग्यो भाग्यवर्धनः
भृंगिरिटी भृंगिमाली भृंगि कुलसैन्नादनः विनतु
को विनीतो पि विनतानन्दनार्चितः वैनतीयो
विनस्रांगो विश्वनायकनायकः विराटको विरा
टश्च विदग्धो विधिरात्मभूः पुष्पदंतः पुष्प
हारी पुष्पमाला विभूषणः पुष्पेषु मर्धनः पु
ष्पो विकर्ती कर्तरीकरः अंतकांतकः चित्रगणः

दे० र० उ० ४८

चित्तचिंतापहारकः प्रचिंत्यो चिंत्यरूपश्च वंद
नः कुलमाण्डकः लिपितो लोहितो लुप्तो लोहि
ताक्षो विलोभकः लुब्धाशयो लोभरतो लाभ
दो लंगघातकः सुंदरासुंदरीपुत्रः समस्तासु
रघातकः नूपुराढ्यो विभवदो नरो नारायणो
रविः विचारी चेतदो वाग्मी वितर्को विजयेश्व
रः सुप्रेतुरूढः सदारूपः सुखदः सुखसेवितः
विकर्तनो वियच्चारी विनयो नटनर्तकः नटो ना
ट्यप्रियो नादो नंतोनंतगुणात्मकः विश्वसृग्विश्व
घाती च विनतास्यो विनत्तकः करालः कामदः
कांतः कमनीयः कलाधरः कारूपरूपः कु
टिलः कुलचारी कुलेश्वरः विकरालो गणश्रेष्ठः
संहारो हारभूषणः रुरूरपुच्छरो रक्तो रेवती
रमणो रमः महाकालो महावेषो महोरगभया
नकः उन्मत्तरूपः कालाग्निरग्निसूर्येंदुलोचनः
सितास्यः सितमाल्यश्च सितदंतः सितांशुमान् अ
सितात्मा भैरवेशो भाग्यवान् भगवान् भगः भर्गो

त्मजो भगावासो भगदो भगवर्धनः शुभंकरः शु
चिः शांतः श्रेष्ठः श्रेयः शचीपतिः वेदादो वेद
कर्त्ता च वेदवेद्यः सनातनः विद्याप्रदो वेदरसो
वैदिको वेदपारगः वेदध्वनिरतो वीरो वेदो वेदा
गमार्थवित् तत्वज्ञः सर्वगः साधुः सदयः सद
सन्मयः निरामयो निराकारो निर्भयो नित्यरूप
भृत् निर्वैरो वैरिविध्वंसी मत्तवारणसन्निभः शि
वंकरः शिवसुतः शिवानंदविवर्धनः शैत्यः श्वे
तः शितश्वेता शुभ्रो मोदकभोजनः देवदेवो।
दिनकरो धृतिमाँद्युतिमान्धवः शुद्धात्मा शु
न् शुद्धमतिमाँ शुद्धात्मा दीप्तिः शुभ्रतः शरण्यः
शौनकः शूरः शारदाम्भोजधारकः दारकः।
शिखिवाहेष्टः शीतः शंकरवल्लभः शंकरो नि
र्भयो नित्यो लयकृल्लास्यतत्परः लूतो लीला ला
रसोल्लासी विलासी विभ्रमो भ्रमः भ्रमणः श
शभृत्सूर्यः शनिर्धरणानंदनः बुधो विबुध
सेनानी बुधराजो बलंधरः जीवो जीवप्रदो जै
त्रः स्तुत्यो नित्यो रतिप्रियः जनको जिनमार्गः।

१. ग्रोजैनमोर्गनिवर्तकः गौरीसुतोगुरुस्त्रवी
२. गोरांगोगणाधिजितः परं पदं परं धाम प
३. रमात्माकविर्गुरुः राहुदैत्यः शिरच्छे
४८ दीकेतुकनककुंडलः ग्रहेन्द्रोग्राहितो
ग्राहोग्रणीर्घुर्घुरनादितः पर्जन्यःपी
वरः पत्रीपीनवक्षोपराजितः वनेचारी
वनपतिर्वनवासीस्मरोपमः पुण्यपूतः
पवित्रंचपरमात्मापूर्णविग्रहः पूर्णेन्दु
शकलाकीर्णो मंत्रः पूर्णमनोरथः पुण्या
त्मा योगगर्भ घोत्ता यात्रिको यज्ञवत्सलः
यशस्वीयजमानेष्टो वज्रभृद्वज्रपंजरः
मणिभूषो मणि मयो मान्योमीनध्व
जाश्रितः मीनध्वजो मनोहारी योगिनां
ग योगवर्धनः द्रष्टा स्रष्टा तपस्वी च विग्रही
तापसंप्रियः तपोमयस्तपोमूर्तिस्तप
नश्चतपोधनः रुरुचकोमोचकोरु

धा साधकैः जप्या संध्यास्वर्चीसुतर्पणे ध्यान
मस्य प्रवक्ष्यामि सर्वदेवरहस्यकम् सर्वरोगा
पहं देवि भोगमोक्षफलप्रदम् अथ ध्यानं क
ल्पांतानलकोटिभास्वरमुखं सिंदूरधूलीज
पा वर्णरत्नकिरीटिनं त्रिनयनं शंखांबुजा ध्या
सनम् नानाभूषणभूषितं स्मितमुखं रत्नाम्ब
रं चिन्मयं सूर्यं स्वर्णसरोजरत्नकलशौ दोर्भ्यां
दधानं भजे यंत्रोद्धारं प्रवक्ष्यामि सर्वाशापरि
पूरकम् सर्वसम्मोहनं दिव्यं सर्वसिद्धिमयं ।
शिवे बिंदुत्रिकोणवसुकोणसुवृत्तरूपं दिव्या
ष्टपत्रविलसद्दहनारणाज्जम् रेखात्रयान्वि
तधरः सदनत्रयं च श्रीचक्रमेतदुदितं सवितु
र्वरेण्यम् लयागमस्य यंत्रस्य वक्ष्ये पार्वति सा
धरात् यस्य श्रवणमात्रेण कोटिपूजाफलं ल
भेत् इंद्राग्नियमरक्षसाधि वरुणानिलवित्तपाः ८
सेशाः पूज्या वहिर्द्वारे यंत्रराजस्य साधकैः ग
णेशश्च एडवेतालौ लोलाक्षौ विकरालकैः प्रेत
द्धास्थाः शिवे पूज्याः वामावर्तेन साधकैः दि ।

३४

दे॰ र॰ उ॰ ५८ स॰

वंसिद्ध मनुष्यांणां गुरु पंक्तित्रयं शिवे त्रूनत्रये च
येमंत्री गंधपुष्पाक्षतादिभि: चंद्रं भौमं बुधं जीवं
शुक्रं सौरं तमस्तथा केतुं वसुदले देवि वामावृ।
त्यार्चयेत् सुधी: दीप्तां सूक्ष्मां जयां भद्रां विमलां
निर्मलां तत: वि[...]तां सर्वतोवक्त्रां ग्रहैर्वसुदले र्च
येत् सूर्यं दिवाकरं भानुं भास्करं रविमीश्वरि
त्वष्टारं तपनं धर्मं वसुकोणे समर्चयेत् हंसं
गृहपतिं देवि त्रिकोणे च त्रयीतनुम् श्रीविन्दु म
ण्डले देवि सवितारं समर्चयेत् कलां सर्चयेत् दे
विवसुकोणे त्रिकोणके तपिनीं तापनीं चैव वरे
ण्यां कर्षिणी युताम् एतां संपूज्य वसुकोणे त्रि
काकोणे सिद्धये मायां विश्वावतीं हे। महाप्रभां।
त्रिकोणे समर्चयेत् विस्फुरां सवितारं च विन्दुविम्बे
समर्चयेत् कमलैः केवलं देवं पूजयेद् बुधा।
निच ...णं पद्मं संपूज्य रत्नाञ्जकलशं शिवे मू
लेन विधिवद् देवं नमे त्कैवल्यसिद्धये लयागम
तदाख्यातं सर्वतन्त्रेषु गोपितुम् मुद्रां पञ्चा भि
यां देवि दर्शयेद् दर्चना विधौ ब्रह्मण्डो विमुखो

मध्ये संयोज्य तर्जनीद्वयम् कनिष्ठिकेच संयोज्य
मध्यमानामिका: पृथक् पद्ममुद्रेयमाख्याता
बिम्बमुद्रां शृणु प्रिये अंगुष्ठौ सम्मुखौ चाधः
सम्मुखौ तु अंगुली वरे स्मरेत् ऊर्ध्वकरयुगं कृत्वा
बिम्बमुद्रेयमीरितम् अधोमुखी वा समध्या
तु ऊर्ध्वं सव्य मध्यमा तथैव कौलिकं कुर्याद्वा
मतः सव्यतोंगुली: इयं तु भास्करी मुद्रा त्रैलो
क्य वशकारिणी सर्वरोगापहाख्याता दर्श
नीयार्चना विधौ अंगुष्ठयोश्च चंद्रार्कौ ज्ञेयौ चा
नामयोस्तथा सितासितौ तर्जन्यो राहुकेतू प्र
लम्बयो: मध्ये तु भास्करं देवं ध्यात्वा मुद्रां प्रद
र्शयेत् आवाहने च गंधादौ नैवेद्ये च विसर्ज
ने धूपदीपादि नैवेद्यं दद्यं सर्वे रवशोल्कया
खशोल्काख्या महामुद्रा शत्रुवर्गविमर्दिनी
रविं दृष्ट्वा प्रणामादौ दर्शनीया महेश्वरि।
महामुद्रा महागोप्या महामातांगडवत्क्रमा
इमां यो भानवीं मुद्रां दर्शयेत् पूजने सुधी: श
तवर्ष सहस्राणां पूजाया: फलमाप्नुयात् प्र

योगा न ष वक्ष्ये हं स्त्र एणा पार्वति सा पर म्‌ ये
षां साधन मात्रेण मंत्रा सि द्धिप्रदो भवेत्‌ स्तम्भ
नं मोहनं चैव मारणाकर्षणौ ततः वशीकरणा
विद्वेषो शांतिकी पौष्टिकी क्रिया एतेषां सा
धनं वक्ष्ये साधकानां हितेछया अप्रकाश्य
मदातव्यं कसौ रोगापहं प्रिये रवौ प्रभाते शय
ना दुत्थाया वश्यकं चरेत्‌ स्नात्वा जपे त्सदा देवि
स्तूपाग्रे वालुका युतम्‌ हुत्वे दशांशतो देवि प
द्मपद्माद्व शर्करा: सर्पिषा स्तम्भनं सद्यो
वादितस्कर पाद्य साम्‌ रवौ मध्याह्न वेलाया
६ जपे प्रयुत संख्यया हुत्वे दशांशा मीशानि घृत
पद्मा न्नागरान्‌ तर्पये त्पयसा सद्यो मोहनं
घुसदामपि रवौ सायं जपे न्मूलं नदीतीरे वि
शीघ्रे सं जप्यम्‌ लमंत्रा युतं शिवे हुत्वे दशांश
मम्भोज शटी घृत कुलथ्य कै: आकर्षणं भवेत्स का
द्यो देवि नाक स्त्रिया मपि रवौ ब्राह्मे मुहूर्ते त्र
स्नात्वा तत्र जपस्थले अयुतं मूलविद्या योद

 37

शांशंजुहुयात्सुधीः घृतमत्स्याऽकर्पूरैप मा
त्वकेसरान् इंद्रोपिवशतां याति किं पुनः क्षुद्र
भूमिपाः सूर्योदयेजपेद्विद्यांसाधकोघृतसं
रध्यया जुहुयात्सपिरम्भोजप त्रपर्पटशर्क
राः विबेणातर्पयेद्देवंभवेद्विद्वेषणंद्विषाम
रवावर्द्धोदितेदेविकुष भूपौजपेन्मनुम प्र
घृतंतद्दशांशेन हुनेन घृतपवाकरौः प्रम्भो
जकेसरंक्षुण्ठीशांतिर्भवतितत्क्षणात् प्रतिवृ
षेरनावृषेराजनीतेर्महेश्वरि रवावस्तंग
२ तेप्यर्धीजपेद्वानौमूलके मंत्रायुतं महादेवि
जुहुयातघृतगोपयः पद्मपद्मादिकिंजल्क
मत्स्याण्डाकदलानिच दशांशंतर्पयेद्धा
त्रीरेणसितयासुधीः महाभिषिर्भवेल्लोके
देवानामपिदुर्लभा इत्ययंपटलोगुह्यः सवि
तुश्चातिवल्लभः सर्वमंत्रमयोदिंगोपनीयोमु ब्यो
मुक्षुभिः इतिश्रीदेवीरहस्येतन्त्रेसूर्यपटलंना
मपटलः श्रीभैरवउवाच अथाहंसवितुर्वक्षे उ
नित्यपूजारहस्यकम् पटलं परमंदिव्यम्पुण्य

देः रं॰ ३॰ ५९ सं॰

पार्वति सांधरम् पंचकृत्सम कृत्वा योगायत्रीसंज
पेच्छिवे सपातकी भवेद्रोगी यदिदंशिवशास्त्रं ॥
सवितुर्नित्यपूजायां प्रकृतिंगद्यरूपिणीम् सर्वतत्व
रहस्याढ्यां वच्मेहं प्राणवल्लभे ॐ ब्राह्ममुहूर्त्ते सम
थाय बद्धपद्मासनः स्वशिरःस्थसहस्रारे धो
मुखकमलकर्णिकान्तर्गतं निजगुरुं चिदानन्द
स्वरूपं ध्यात्वा नत्वा च दर्शनानंदाप्लुतो भूत्वा हंसः
सोहं स्वाहेति ध्यात्वा जप्त्वा गुरवे निवेद्य तदाज्ञां गृही
त्वा बहिर्निर्गत्य मलादीन्संत्यज्य वर्णपूर्वं शौचमाचा
य तत्वत्रयेणाचम्य दंत धावनं कुर्यादिति क्लींसर्वज
नमनोहराय कामदेवाय वौषडिति दंतान्संशोध्य
मुखं गण्डूषत्रयं विधाय प्रणवेन त्रिराचम्य शिरोमु
खहृत्कुक्षिनाभिपृष्ठलिंगजानुपादेषु पानस प्राणा
मानोदानव्यानादीन्नियम्य नद्यादौ गत्वा मृत्त्रयं मू
लेन त्रिधाभिमंत्र्य मालापकर्षणं स्नानं निर्माय
ॐ गां गीं गूं गंगे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिंधुकावेरि जलेस्मिन्सन्निधिं कुरु इ
त्यंकुशमुद्रया सूर्यमण्डलात्तीर्थान्यावाह्य ॐ

धा

भगवन्भवन्मूर्ते शग्रहनायक भास्कर चिद्रूप
वेदनेत्रेशपरमार्थावयं प्रभो यावत्तावत्तर्पयिष्या
मितावद्भ्रानोऽहावह इत्यावाह्य तृतीयां मृदं मे
गेविलिप्य मूलं सप्तधा संजप्य कुम्भमुद्रां ।
प्रदर्श्य जले सिम्मज्जेत् इति स्नात्वा देवं ध्यात्वा
मूलेन देवायार्घ्यत्रयं दत्वा मूलविद्यां दशधा
जप्त्वा सूर्यगायत्र्या महामार्तण्डायार्घ्यत्रयं द ।
द्यात् ओं हां सूर्याय विद्महे ह्रीं सः ज्योतीरूपाय
धीमहि तन्नो हंसः परमात्मा प्रचोदयात् ३ ओं ।
ज हंसः महामार्तण्ड प्रकाशशक्तिसहिताय एषते
र्घो नमः इत्यर्घ्यत्रयं दत्वा मूलेन त्रिराचम्य त्रि
र्मार्जनपूर्वमाचम्य वासोन्यं परिधाय संध्यां तु ×
कुर्याद्यथा जले स्वप्रं स्वदेह उपस्पृश्य वामहस्ते श्य ×
जलं धृत्वा दक्षहस्तेनाच्छाद्य लं वं रं यं हं इति ।
त्रिरभिमंत्र्य : दक्षकरे धृत्वा तद्गलिताम्बुबि
न्दुभिः स्वमूर्ध्नि द्वादशभिः संमार्ज्य इडया ।
न्तर्नीयाशरीरं कलुषं प्रक्षाल्य वामनासया ति ।
म

दे॰
र॰
अ॰
सू॰
६०

विरिच्य तज्जलं कुक्षेपापरूपं स्ववामभागस्थ
वज्रशिलायामास्फालयेत् इति मलापकर्षणं
कृत्वा ॐ ह्रीं आत्मतत्वं शोधयामि स्वाहा ॐ ह्रीं वि
द्यातत्वं शोधयामि स्वाहा ॐ ह्रीं शिवतत्वं शोधया
मि स्वाहा ~~ॐ ह्रीं विद्यातत्वं शोधयामि स्वाहा ॐ~~
~~ह्रीं शिवतत्वं शोधयामि स्वाहा~~ इत्याचम्य पूर
कं १६ कुम्भकं ६४ रेचकं ३२ इति त्रिः प्राणाया
मं निर्माय गायत्रीं दशधा जपेत् सवितुर्देवि
धा गायत्रीं कौलिकों दशधा जपेत् महापातकयुक्तो
पि सर्वरोगैः प्रमुच्यते इति जप्त्वा मूलं यथाश
क्त्या जप्त्वा जपं देवाय समर्प्य मूलमुच्चार्य उ
दयन्तमनाभासं परमं व्योम चिन्मयम् अव्ययं
सच्चिदाकाशमघवन्मज्योतिरुत्तमम् स्वाहेति
उपस्थायेति जलाञ्जलिं दत्वा पुनर्जले श्रीचक्रं
वायोनिचक्रं बिन्दुमण्डितं विलिख्य मूलान्ते श्री
महामार्ताण्डदेवः सूर्यः सविता विस्फुरा स
हितः तृप्यतामिति द्वादशवारं संतर्प्य प्रत्येकं

परिवारदेवता: संतर्प्य पित्रादितर्पणंविधाय
त्रिराचम्य स्नानेशायवरुणायवौषडितिनत्वादे
वं सदेवेकंविसृज्य हृत्कुरी शयाकाशांतली
नंध्यात्वास्नानशाटीनिवर्त्य यागमंडपमाग
च्छेदितिसंध्याविधि: तत्रपादौप्रक्षाल्यगेहं
ताप्रकाविश्य सामान्यार्घ्योदकेनाभ्युक्ष्य ॐह्रां
देहल्यैनम: गांगणपतयेनम: ॐसरस्वत्यै
नम: ॐदुंदुर्गायैनम: ॐक्षंक्षेत्रपालायनम:
ॐमध्येवास्तुदेवताभ्योनम: इतिपूर्वद्वारादार
भ्य उत्तरद्वारपर्यंतमभ्यर्च्य द्वारोर्ध्वे गंगायैन
म: दक्षिणेयमुनायैनम: वामेध: सरस्वत्यैनम:
उत्तरेवक्रायनम: मध्येसुधार्णवायनम: इ
तिसंपूज्य मूलेननिरीक्ष्य क्रोधादिकाभि: संता
ड्य यथार्हमासनउपविश्य शोधनंकुर्यात्
ॐप्रां-आसनशोधनमंत्रस्य मेरुपृष्ठऋषि:
सुतलं छंद: कूर्मोदेवता आसनशोधने
विनियोग: प्रींपृथिव्यैनम: महितयाधृता
लोकादेवित्वंविष्णुनाधृता तंचधारयमांदे।

दे. र. उ. सू. ६१

विपवित्रं कुचासनम् ॐ क्रां ह्रां ह्रीं आधारशक्तये
कमलासनायनमः ॐ अनन्तायनमः पद्मना
लायनमः पद्मायनमः परागेभ्योनमः ॐ अ
ष्टदलपद्मायनमः सहस्रदलपद्मायनमः
ॐ हंसः श्रीकर्णिकायैनमः ॐ सप्ततुरगेभ्यो
नमः इतिसंपूज्य दिव्यादृष्ट्यादिव्यास्तालुत्रये
णान्तरिक्षगसप्ततुरगेभ्योनमः इतिसंपूज्यादि
व्यदृष्ट्यादिव्यास्तालत्रयेणांतरिक्षगतान्वामपा
र्ष्णिघातत्रयेणभौमान्विघ्नानुत्सार्य ॐ अपसर्प
येभूता न्तु ते भूता भुवि संस्थिताः ये भूता विघ्नकर्तारस्ते न
श्यन्तु शिवाज्ञया इत्यनेन प्रक्षेपेण भूतानि उत्सार्य
ॐ ह्रः अस्त्राय फट् इति दिग्बन्धनं कृत्वा ॐ हंसः
मां रक्ष २ हुं फट् स्वाहा इत्यात्मरक्षां विधाय फट्
वामनासपुटे वायुमापूर्य ह्रीं फट् कुम्भयित्वा
सः फट् विरेचयेति स्वात्मानं हंसरूपं ध्यात्वा ॐ हूं
हंसः इत्यनेन कुचेन कुलकुण्डलिनीं सार्धत्रिवल
यां दीपिकाकारं स्थाप्य प्रदीपकलिकाकारं।

विसतन्तुतनीयसी तडित्कोटिप्रभांचैव चंद्रको
टिसुशीतलाम् सूर्यकोटिदुराधर्षांवह्निको
टिकरालकाम् सुषुम्णामार्गेण षट्चक्रं
भित्वा ब्रह्मपद्मं नीत्वा परशिवेन संयोज्य
सामरस्यादुद्भवामृतानन्देन संतर्प्य पुनस्ते
नैव पथा मूलाधारं प्रापयित्वा वामे पापपुरु
षं श्मश्रुलं रक्ताक्षं धूम्रवर्णं खड्गचर्मधरंत्वां
गुष्ठाकारं विचिन्त्य यं रं वं लं हमिति भूतवीजैः
शोषणदहनाप्लावनादीकुर्यात् यथाप्रादौ
प्राणायामयोगेन प्राणवीजेन षोडशवारजप्ते
न शोषयेत् रमिति वह्निवीजेन चतुःषष्ठिवारज
प्तेन वमिति वरुणवीजेन द्वात्रिंशद्वारजप्तेन प्ला
वयेत् लमिति भूवीजेन दशवारजप्तेन दृढीकु धा
र्यात् हंवीजेन सूक्ष्ममात्माकमात्मानं ध्यात्वा हृद
यारविन्दे कर्णिकायां देवं सूर्यं ध्यायेत् देदी
प्यमानं मुकुटं मणिकुण्डलमण्डितम् देवं स
हस्रकिरणम् विस्फुरल्लिंगितं भजेत् इति ध्या
त्वा स्वात्मानं देवरूपं ध्यात्वा ओं ह्रां ह्रीं क्रौं ह्रौं ।

८.४३

ह्रीं हंस: मम प्राणा इह प्राणा: इह प्राणा इह प्राणा: ।
दे. ॐ मम जीवा इह स्थिता: ॐ मम सर्वेंद्रियाणि इह स्थि
र. तानि मम वाङ्मनश्चक्षुश्रोत्रजिह्वाघ्राणाः प्राणा इहैवा
उ. गत्य सुखं चिरंतिष्ठंतु स्वाहा इति भूतशुद्धि: प्राणप्र
स्त. तिष्ठाक्रम: ततो मूलन्यासं विधाय मूलांते शिर
६२ सि त्रि: सूर्यं संपूज्य मंत्रसंकल्पं कुर्यात् ॐ अस्य
श्रीसूर्यमंत्रस्य श्रीब्रह्माऋषि: गायत्रीछंद: श्री
सविता देवता ह्रां बीजं ह्रीं शक्ति: ॐ कीलकम् श्री
धर्मार्थकाममोक्षार्थे सूर्यपूजायां विनियोग:
ऋ यन्यास: श्रीब्रह्माऋषये नम: शिरसि गा
यत्रीछंदसे नम: मुखे श्रीसवितायै देवता
यै नमो हृदि ह्रां बीजाय नमो नाभौ ह्रीं शक्त
यै नमो गुह्ये ॐ कीलकाय नम: पादयो: धर्मा
र्थकाममोक्षार्थे जपे विनियोग: इति सर्वांगेषु ।
इति ऋष्यादिन्यास: ॐ ह्रां अंगुष्ठाभ्यां नम: ॐ
ह्रीं तर्जनीभ्यां स्वाहा ॐ ह्रीं मध्यमाभ्यां वौषट् ॐ
ह्रौं कवचाय हुं ॐ ह्रौं नेत्राभ्यां वौषट् ॐ ह्र: अ
स्त्राय फट् इति करन्यास: ॐ ह्रां हृदयाय नम:

ॐ ह्रीं शिरसे स्वाहा ॐ हूं शिखायै वौषट् ॐ कव
चाय हुं ॐ ह्रौं नेत्राभ्यां वौषट् ॐ ह्रः अस्त्राय फट्
इति न्यासः ॐ नमः शिरसि ॐ ह्रां नमो नेत्रयोः
ह्रीं मुखे सः नमो हृदि सूं नमो कुक्षौ र्यां नमो
नाभौ यें नमो जान्वौ नं नमः पादयोः मः नमः
शिरसि पादपर्यंतम् इति सप्तधा न्यापयेत् इ
ति मूलन्यासः ॐ ह्रां ऋग्वेदात्मने सूर्याय नमः
शिरसि ॐ ह्रीं यजुर्वेदात्मने सूर्याय नमः कुक्षौ
ॐ सः सामवेदात्मने सूर्याय नमो गुह्यलिंगयोः
वे ॐ अथर्ववेदात्मने सूर्याय नमः पादयोः रिति
त्रिर्ध्या पयेत् इति वेदन्यासः ॐ ह्रां आत्मरूपा
य परसूर्याय हृदयाय नमः ह्रीं परमात्मने सूर्याय न
मः शिरसे स्वाहा ॐ हूं सर्वभूतात्मने सूर्याय
शिखायै वौषट् ॐ ह्रैं ज्ञानात्मने सूर्याय कव
चाय हुं ॐ ह्रौं अन्तरात्मने सूर्याय नेत्राभ्यां वौ
षट् ॐ ह्रां सोमात्मन्यासः ह्रां सोमात्म
ने सूर्याय हृदयाय नमः ॐ ह्रीं भौमात्मने सू

दे.र. यीयशिरसेस्वाहा ॐ ह्रूं ध्रुवधाम्नेसूर्यायशि
उ.ह्र. खायैवौषट् ॐ ह्रैं जीवात्मनेसूर्यायकवचाय
६२ क्रौं हुं ॐ ह्रौं शुक्रात्मनेसूर्यायनेत्राभ्यांवौषट् ॐ ह्रः
सोरात्मनेसूर्यायअस्त्रायफट् इतिषडंगन्या
सः एवंकरन्यासः इतिहृन्यासः ॐ अं आं
इंईंउंऊंऋंॠंलृंॡंएंऐंओंऔंअंअः सूर्याय
नमः इतिमूलाधारे ह्रां कंखंगंघंङं सूर्याय
नमः इतिमणिपूरे ह्रीं चंछंजंझंञं सूर्याय
नमः इतिस्वाधिष्ठाने सः टंठंडंढंणं सू
र्यायनमः अनाहतेसूर्याय तंथंदंधंनं सू
र्यायनमोविशुद्धौ पंफंबंभंमं सूर्यायनमः
आज्ञायां मः यंरंलंवंशंषंसंहंलंक्षः सूर्या
यनमः करन्ध्रे इतिसप्तधाव्यापयेत् इ
तिमूलशुद्धिमातृकान्यासः अं आं गायत्री
छंदसेसूर्यायनमः ब्रह्मरंध्रे इं ईं त्रिष्टुप
छंदसेसूर्यायनमः आज्ञायां उं ऊं अनुष्टुप
छंदसेसूर्यायनमोविशुद्धौ ऋं ॠं लृं ॡं उष्णि

व्यक्नदसेसूर्यायनमोनाहते रां रों विराट छंदसेसू
र्याय नमो स्वाधिष्ठाने ॐ औं सम्राट् छंदसे सूर्याय
नमो मणिपूरे ॐ प्रा: बृहती छंदसे सूर्याय नमो
मूलाधारे इति सप्तधा व्यापयेत् इति सप्त छंदो
न्यास: ॐ घोराश्वाय सूर्याय नम: स्वाधिष्ठाने ब्र
ह्मरंध्रे ह्रीं पाण्डुराश्वाय सूर्याय नम: ॐ प्रज्ञा
यां ह्रीं सिताश्वाय सूर्याय नमो विशुद्धौ स: श्वे
ताय सूर्याय नम: ॐ अनाहते सूर्याय ॐ हिमाश्वा
धि= य स्वाधिष्ठाने सूर्याय नन्दीराश्वाय मणिपूरे न
मो सूर्याय नम: ॐ आज्ञायां ह्रीं सावित्री देवता
यै नम: सूर्याय नम: ॐ स: सरस्वती देवतायै
सूर्याय नमो मणिपूरे नवरत्नवादिनी देवता
यै सूर्याय स्वाधिष्ठाने म: पंचमुखी देवतायै
सूर्याय नम: मूलाधारे इति त्रिर्व्यापयेदिति गा
यत्री न्यास: शिवतत्त्वाय सूर्याय नमो ब्रह्मरंध्रे
ह्रां शक्तितत्त्वाय सूर्याय नम: ॐ आज्ञायां ह्रीं मा
यातत्त्वाय सूर्याय नम: विशुद्धौ स: विद्या

म: कुंदाश्वाय सूर्याय नम: ॐ प्रज्ञा देवता
यै नम: सूर्याय नम: करंध्रे ॐ ह्रां गायत्री
देवतायै सूर्याय नम: ×

48

दे॰र॰ ततायनमः सूर्यायनमोनाहते सूर्यकालतता
उ॰स्तू॰ यसूर्यायनमः स्वाधिष्ठाने नं नयिति ततायन
६४ मः सूर्यायनमो मणिपूरे मः ग्रात्मतताय
सूर्यायनमोमूलाधारे इतित्रिर्व्यापयेदिति
तन्यासः ॐकामरूपपीठेशायसूर्यायनमः
करन्धे ह्रां ३ ह्रीं शानपीठेशायसूर्यायनमः
ग्राज्ञायां ह्रीं जालन्धरपीठेशायसूर्यायन
मोविशुद्धौ सः पूर्णागिरिपीठे शायसूर्याय
नमोऽनाहते सूर्यायमधुपुरीपीठेशायसूर्या
यनमः स्वाधिष्ठाने नं ग्रवंतीपीठेशायसूर्या
यनमोमणिपूरे मः वाराणसीपीठेशायसू
र्यायनमोमूलाधारे मूलंटकुरुक्षेत्रपीठे
शायनमः सूर्यायनमोसर्वांगे इतिपीठन्या
सः इतित्रिर्व्यापयेत यथोक्तनिमायामूल
विद्यानेदात्मग्रहणाद्भयः छंदस्तु रगगायत्री
ततपीठ दयाप्राणाः एते हि द्वादशान्यासाः
सर्वते ब्रह्मगोपिताः वर्णितास्तव देवेशि सर्व

इतिद्वादशन्यासाः ६४

रोगापहारकाः एतान्स : कुरुते न्यासा न्स वितुः
सर्वसिद्धये तस्य लक्ष्मी धनारोग्य विद्याकीर्ति
सुखाप्तये न्यासान्ते भास्करं ध्यायेत् पूजाको
टि फलं लभेत् अथ मातृकान्यासः अं कं खं गं घं
ङं आं अंगुष्ठाभ्यां नमः इं चं छं जं झं ञं ईं तर्ज
नीभ्यां स्वाहा उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वष
ट् एं तं थं दं धं नं ऐं अनामिकाभ्यां नमः ओं पं फं
बं भं मं औं कनिष्ठकाभ्यां नमः अं यं रं लं वं शं षं सं
हं लं क्षं अः करतलकरपृष्ठाभ्यां नमः एवं षडं
गन्यासः इति स्वराद्यन्तमातृकान्यासः अं नमः
शिरसि आं नमो मुखवृत्ते इं नमो दक्षनेत्रे ईं न
मो वामे उं नमो दक्षकर्णे ऊं नमो वामे ऋं नमो
ॠ दक्षनासायां ॠं नमो वामायां लृं नमो दक्षगण्डे
लॄं नमो वामे एं नमो ऊर्ध्वोष्ठे ऐं नमो अधरोष्ठे
ओं नमो ऊर्ध्वदन्तपंक्तौ औं नमः अधोदन्तपंक्तौ
अं नमः शिरसि अः नमो मुखवृत्ते कं नमो दक्षबा
हुमूले खं नमो कुर्परे गं नमो मणिबन्धे

घं नमोऽङ्गुलिमूले ङं नमोऽङ्गुल्यग्रे चं नमो वा
मबाहुमूले छं नमः कूर्परे जं नमो मणिब
न्धे झं नमोऽङ्गुलिमूले ञं नमोऽङ्गुलिमूलाग्रे टं
नमो दक्षपादमूले ठं नमो जानुनि डं नमो
गुल्फे ढं नमोऽङ्गुलिमूले णं नमोऽङ्गुल्य
ग्रे तं नमो वामपादमूले थं नमो जानुनि दं
नमो गुल्फे धं नमोऽङ्गुलिमूले नं नमोऽङ्गु।
ल्यग्रे पं नमो दक्षपार्श्वे फं नमः वामे बं नमः
पृष्ठे भं नमो नाभौ मं नमो जठरे यं नमो हृदि
रं नमो दक्षांसे लं नमो ककुदि वं नमो वामांसे
शं नमो हृदादि दक्षहस्ताग्रान्ते षं नमो
हृदादि वामहस्ताग्रान्ते सं नमः पादादिशि
रः पर्यन्तं हं नमः पादयोः मूलं शिरसः
पाददपर्यन्तं इति व्यापयेत् इति न्यासं विधा
य हृत्कमलकर्णिकान्तर्गतं देवं ध्यायेत्।
जपापुष्प समविम्बाभं द्विभुजं चारुणाम्बरम्
सप्ताश्वरथसंयुक्तं मणिकुण्डलमण्डितम्॥

शिरसः पादपर्यन्तं हि शिखि
पादयोः हृदि मस्तके
पाद: ऊं नमः शिरसि ह्रीं नमो हृदि

स: नमः ४५

६१

ग

कीयूरहाराभरणांकलशाम्भोजधारिणम् स
वितारंजंज्ञायंविस्फुरालिंगितंभजे एवंध्या
ग त्वामानसोपचारैरंध्य स्ववामेत्रिकोणवृत्त
मण्डलमविलिख्य रं वह्निमण्डलायदशक
लात्मनेनमः इतिसंपूज्य त्रिपदींलालितां
संस्थाप्य तत्रशंखंसंस्थाप्य शंखे अंअर्क
मण्डलाय नमः द्वादशकलात्मने संस्थाप्य
नमः इतिसंपूज्य तीर्थजलेनापूर्य सौ. सो
ममण्डलायषोडशकलात्मनेनमः इत्यभ्यर्च्य
हंसः सूर्यायहींनमः इतित्रिः गंधाक्षतपुष्पैः
समभ्यर्च्य ॐ गंगेचयमुनेचैव गोदावरि
सरस्वति नर्मदेसिंधुकावेरि जलेस्मिंसन्नि न
धिंकुरु इतिसूर्यमंडलादंकुशमुद्रयाती
र्थान्यावाह्य ॐ ह्रां ह्रीं हंसः शुचिषदे सू
र्यायनमः इतिसंपूज्य धेनुयोनिशंखगरो
ल्कामुद्राः प्रदर्श्यप्रणमेत् दर्शनेनापिशंख
स्यकिंपुनः स्पर्शनेनच विलयंयांतिपा

त्र

पानिह्मिवज्रास्करोदये इतिसामान्यार्घ्यविधा
दं.र. य स्वधार्घ्यंकुर्यात्पश्चा सामान्यार्घ्यस्यदक्षे
उ.म्र. त्रिकोणवृत्तचतुरस्रं विलिख्य सामान्यार्घ्यो
६६ दकेनाभ्युक्ष ओंह्रां हृदयाय नमः पूर्वे ओंह्रीं
शिरसे स्वाहा दक्षिणे ओं हूं शिखायै वौषट् प
श्चिमे ओं ह्रैं कवचाय हुं उत्तरे ओं ह्रौं नेत्राभ्यां
वौषट् मध्ये ओं ह्रः अस्त्राय फट् ऊर्ध्वे इति
संपूज्य ओं मि र्तिशाने ह्रामित्याग्नेय्यां सइत्य
च्य ग्रे ३ तिश्रं संपूज्य क्षालित्वाधारं संस्थाप्या
रं वह्निमण्डलाय दशकलात्मने नमः इत्यभ्य
र्च्य तत्र सौवर्णं राजतं वापिरक्तवाम्रणमयघ
टं स्थापयेच्छोभितंदिव्यमालाभिंकुंकुमा
र्चितम् इति संस्थाप्य हंसः सूर्यमंडलाय
द्वादशकलात्मने नमः इतिसंपूज्य मधुमा
त्रेणापूर्य तत्रानामिकांगुष्ठधारायातेनसंपू
र्य सौः सोममण्डलात्मनेनमः इति सोमम
ण्डलादमृतीकरणमुद्रयाऽमृतं ध्यात्वा त।